
ISSN: 2456-9186, Vol. II, Issue. I, June-2018

वागर्थः
(An International Journal of Sanskrit Research)
Journal Homepage: http://cphfs.in/research.php



# द्रोणो व्रीहिः

श्रीमन्तभद्रः
सहायकाध्यापकः, संस्कृतविभागः
राजानरेन्द्रलालखानमहिलामहाविद्यालयः
मेदिनीपुरम्, पश्चिमबङ्गः
Email: srimantabhadra@gmail.com

**निबन्धसङ्क्षेपः** प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (अष्टा.- २.३.४६) इति सूत्रे परिमाणमात्रे प्रथमाया उदाहरणं सिद्धान्तकौमुद्यां द्रोणो व्रीहिरिति प्रदत्तम्। तदेवोदाहरणं कैयटेनापि प्रदीपे समर्थितम्। परन्तु उभयोः समन्वयप्रकारो भिन्नः। नागेशस्तु परिमाणग्रहणस्य उदाहरणं द्रोणः इत्येव ब्रूते। एवमत्र विवदन्ते विद्वांसः। निबन्धेऽस्मिन् तेषां मतं विस्तरेण प्रतिपाद्य तेषु कतमः पक्षः समाश्रयणीय इति युक्त्या प्रतिपाद्यते।

**मूलपदानि–** प्रातिपदिकार्थः, प्रवृत्तिनिमित्तम्, परिमेयः, परिमाणम्, सत्ता, लक्षणा ।

## १. उपोद्घातः

अब्धिमन्थनोत्थचन्द्रकौमुदीवत्पाणिनीयव्याकरणग्रन्थाब्धिमन्थनोद्भूता प्रकरणप्रचुरप्रज्वलितावैयाकरणसिद्धान्तकौमुदी कौमुदीव चिररात्राय प्रतीक्षमाणानां जिज्ञासुजनानामाह्लादाय विद्वच्चूडामणिना भट्टोजिदीक्षितेन विरचिता। तस्याः कारकप्रकरणे प्रथमसूत्रत्वेन प्रथमाविधायकं प्रातिपदिकार्थलिङ्गपरिमाण-वचनमात्रे प्रथमा इति सूत्रं समुपन्यस्तम्। तस्य सूत्रस्य व्याख्यानावसरेऽवादि दीक्षितेन–"परिमाणमात्रे द्रोणो व्रीहिः" (वैयाकरणसिद्धान्तकौमुदी, प्रथमो भागः, पृष्ठम्– ५९४) इति। अर्थात् परिमाणग्रहणस्य उदाहरणं द्रोणो व्रीहिरिति। परन्तु सूत्रस्यास्य भाष्ये भाषितं भाष्यकारेण–"अथ परिमाणग्रहणं किमर्थम्? द्रोणः खारी आढकमित्यत्रापि यथा स्यात्" (महाभाष्यम्, द्वितीयो भागः, पृष्ठम्– ५१३) इति । अर्थात् परिमाणग्रहणस्य उदाहरणं द्रोणः इत्येव भाष्यकृता अभिहितम्। एवञ्च ग्रन्थविरोधः स्फुट एव। तत्र द्रोणः इति उदाहरणस्य द्रोणो व्रीहिरित्यत्रैव तात्पर्यम् अथवा द्रोण इत्येव उदाहरणमिति विवादस्थलम्। स्थलमिदमाश्रित्य मुनित्रयकल्पा मुख्यमल्लाः कैयटदीक्षितनागेशाः परस्परं विवदन्ते। तत्र कैयटदीक्षितौ परिमाणग्रहणस्य द्रोणो व्रीहिरित्येव उदाहरणमभ्युपगच्छतः, नागेशो द्रोण इत्येव उदाहरणमित्यभिप्रैति। तत्र च कैयटदीक्षितयोः समन्वयरीतिभेदात् नागेशस्य च उदाहरणभेदात् विवादः स्फुट एव। लघुनिबन्धेऽस्मिन् प्रातिपदिकार्थसूत्रस्य सामान्यार्थं विचार्य मल्लानां राद्धान्तान् वर्णयित्वा तानि समीक्ष्य किमुदाहरणं ग्राह्यमिति प्रस्तोष्यते।

## २. प्रातिपदिकार्थसूत्रार्थविचारः

प्रातिपदिकार्थश्च लिङ्गश्च परिमाणञ्च वचनञ्चेति प्रातिपदिकार्थलिङ्गपरिमाणवचनानि, प्रातिपदिकार्थलिङ्ग-परिमाणवचनान्ये-वेति अस्वपदविग्रहे मयूरव्यंसकादयश्च (अष्टा.- २.१.७२) इति नित्यसमासे प्रातिपदिकार्थलिङ्गपरिमाण-वचनमात्रम् इति लभ्यते। द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति न्यायेन मात्रशब्दस्य प्रत्येकमन्वयः। ततश्च १) प्रातिपदिकार्थमात्रे प्रथमा २)लिङ्गमात्रे प्रथमा ३) परिमाणमात्रे

प्रथमा ४) वचनमात्रे प्रथमा इति चत्वारि वाक्यानि लभ्यन्ते। सूत्रस्थेन प्रातिपदिकार्थपदेन प्रवृत्तिनिमित्तं, व्यक्तिः, लिङ्गं, सङ्ख्या, कारकञ्चेति पञ्चकं न गृह्यते। तथा सति सूत्रे लिङ्गग्रहणमनर्थकं स्यात्, प्रातिपदिकार्थत्वेनैव प्रथमासिद्धिर्भवेत्। अतः लिङ्गग्रहणसामर्थ्यात् त्रिकादिपक्षाणां नात्र ग्रहणम्। अपि तु इह पारिभाषिकः प्रातिपदिकार्थो गृह्यते। तस्य किं स्वरूपमित्याकाङ्क्षायामाह दीक्षितः–"नियतोपस्थितिकः प्रातिपदिकार्थः" (वैयाकरणसिद्धान्तकौमुदी, प्रथमो भागः, पृष्ठम्–५९२) इति। यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेनोपस्थितिः स प्रातिपदिकार्थः इति तदर्थः। "यमर्थं प्रातिपदिकं न व्यभिचरति स प्रातिपदिकार्थः" (महाभाष्यम्, प्रदीपः, द्वितीयो भागः, पृष्ठम् - ५१३) इति ब्रुवाणः कैयटोऽपि तथैवाभिप्रैति इति विज्ञायते। तेन च लिङ्गग्रहणमपि चरितार्थम्। यतो हि तटः, तटी, तटम् इत्याद्यनियतलिङ्गस्थले लिङ्गस्य नियततया उपस्थितेरभावात् तस्य प्रातिपदिकार्थत्वाभावात् तत्र प्रथमवाक्येन प्रथमा न सिद्ध्यति। अतः तत्र द्वितीयवाक्येन प्रथमासिद्ध्यर्थं तच्चरितार्थम्। ननु केवलानां लिङ्गादीनां प्रातिपदिकार्थं विना कुत्राप्यनुपस्थितेः "लिङ्गमात्रे प्रथमा" इत्यादिकं नोपपद्यते। अतः लिङ्गमात्राधिक्ये प्रथमा इत्येवंरूपेण व्याख्येयम्। ततश्च–

१) प्रातिपदिकार्थमात्रे प्रथमा
२) लिङ्गमात्राधिक्ये प्रथमा
३) परिमाणमात्राधिक्ये प्रथमा
४) वचनमात्रे प्रथमा

इति चत्वारि वाक्यानि लभ्यन्ते। अत एव दीक्षितेन– "प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात्" (वैयाकरणसिद्धान्तकौमुदी, प्रथमो भागः, पृष्ठम् - ५९२) इति सूत्रार्थः सिद्धान्तकौमुद्यां प्रोक्तः। आदिपदस्य स्वारस्यं प्रकटयन् बालमनोरमाकारश्चाह– "लिङ्गमात्राधिक्ये परिमाणमात्राधिक्ये चेत्यर्थः" (वैयाकरणसिद्धान्तकौमुदी [बालमनोरमा], प्रथमो भागः, पृष्ठम् - ५९३) इति । एवञ्च प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्राधिक्ये वचनमात्रे प्रथमा भवति इति सूत्रार्थः फलितः।तत्र उच्चैरित्याद्यलिङ्गाः रामः, श्रीः इत्यादिनियतलिङ्गाश्च प्रथमवाक्यस्य उदाहरणानि। तटः, तटी, तटम् इत्याद्यनियतलिङ्गा द्वितीयवाक्यस्य उदाहरणानि। तृतीयवाक्यस्य उदाहरणं हि द्रोणो व्रीहिरिति। एकं, द्वे इत्यादीनि चतुर्थवाक्यस्य उदाहरणानि।

तत्र तृतीयवाक्यस्य "द्रोणो व्रीहिः" इत्युदाहरणं दीक्षितेन यत् प्रदत्तं तदाश्रित्य विवदन्ते वादिनः इति पूर्वमेव उक्तम्। इदमेकं स्थलं समाश्रित्य कैयटदीक्षितनागेशाः परस्परं भिन्नमभिप्रायं प्रकटीकुर्वन्ति। क्रमशोऽधस्तेषां विचाराः प्रस्तूयन्ते–

### २.१. कैयटाशयः

यद्यपि कैयटः कण्ठरवेण परिमाणग्रहणस्योदाहरणं द्रोणो व्रीहिरिति न उदितं तथापि तस्य व्याख्यानात् तदेव तस्य इष्टमुदाहरणमिति विज्ञायते। तथाहि– प्रातिपदिकार्थसूत्रे परिमाणग्रहणं किमर्थमिति जिज्ञासायामभाषि भाष्यकारेण–"द्रोणः खारी आढकमित्यत्रापि यथा स्यात्" इति। तदेवं व्याख्यातं कैयटेन– "द्रोण इति। यदा मानमेयसंबन्धाद् व्रीह्यादौ द्रोणादयो वर्तन्ते तदा व्यभिचारान्नास्ति मेयस्य प्रातिपदिकार्थत्वम्" (महाभाष्यम् [प्रदीपः], द्वितीयो भागः, पृष्ठम् - ५१३) इति । व्याख्यानस्यास्यायमाशयः–

द्रोणः परिमाणविशेषः। व्रीहिः धान्यम्। व्रीहिरित्यत्र जातावेकवचनम्। व्रीहिराशिरिति तदर्थः। एकस्या व्रीहिव्यक्तेर्हि द्रोणपरिमाणं न सम्भवति। द्रोणो हि परिच्छेदकः। व्रीहिश्च परिच्छेद्यः। ततश्च नीलो घटः इत्यत्र समानविभक्तिकस्थले यथा नीलाभिन्नो घटः इति बोधो जायते, तथा द्रोणो व्रीहिः इत्यत्र तादृशबोधो न सम्भवति, प्रतीतिविरोधात्। धर्मधर्मिणोर्भेदसम्बन्धेनान्वयो हि प्रसिद्धः। अतो द्रोणपदस्य द्रोणाख्यपरिमाणविशेषपरिमेये लक्षणा स्वीक्रियते। ततश्च उभौ अपि परिमेयपरौ इत्यतः प्रतीतिविरोधाभावात् सिध्यति अभेदान्वयः। परन्तु तदा द्रोणपदात् द्रोणद्रोणत्वपुंस्त्वपरिमाणापेक्षया परिमेयार्थः अधिकं भासते, स च व्रीह्यादिपदसमभिव्याहारे एव। अतः स व्यभिचारी। एवञ्च परिमेयार्थस्य नियतोपस्थितिकत्वाभावात् प्रातिपदिकार्थे प्रथमा इति प्रथमवाक्येन प्रथमा न सिद्ध्यति, तदर्थं परिमीयतेऽसौ इति कर्मव्युत्पत्त्या परिमेयपरो यः कर्मणि ल्युटि निष्पन्नः परिमाणशब्दः स सूत्रे उपात्तः, ततः परिमेयाधिक्ये अपि प्रथमा स्याद् इत्येतदर्थं परिमाणग्रहणमिति कैयटमतिः।

यदा केवलद्रोणशब्दो विद्यते तदा द्रोण-द्रोणत्व-पुंस्त्व-परिमाणरूपार्थाः नियमेन भासन्ते, अतस्तेषां नियतोपस्थितिकत्वेन प्रातिपदिकार्थत्वात् द्रोणशब्दात्प्रथमवाक्येनैव प्रथमा सिद्ध्यति। यद्वा "अस्त्रियामाढकद्रोणौ" इति कोशवचनात् कदाचित् पुंस्त्वस्य कदाचित् स्त्रीत्वस्य वा भानं भवति इत्युच्यते चेद् द्वितीयवाक्येनैव द्रोणशब्दात् प्रथमा सिद्धा। परन्तु व्रीह्यादिमेयवाचकपदान्तरसमभिव्याहारे अर्थात् द्रोणो व्रीहिरिति अवस्थायां द्रोणशब्दात् परिमेयार्थोऽधिकं भासते, अतः परिमेयाधिक्ये प्रथमाविधानार्थं परिमाणग्रहणमिति बोद्ध्यम्। एवञ्च **परिमेयसङ्ग्रहाय** परिमाणग्रहणमित्युपनिषत्।

उत्तरग्रन्थे कैयटानुयायिनोऽपि एवमेव अब्रुवन्। तदुक्तं भट्टनारायणेन प्रक्रियासर्वस्वे–

प्रस्थाद्या मानपात्रार्थास्ते तत्परिमिते यदा।
व्रीह्यादिके प्रवर्तन्ते प्रस्थो व्रीहिरसाविति॥

तदा परिमितत्वाख्यो धर्मोऽस्ति स्वार्थतोऽधिकः।
तत्रापि प्रथमासिद्ध्यै परिमाणपदं विदुः॥
(प्रक्रियासर्वस्वम् (चतुर्थभागः), पृष्ठम्– १११) इति।

प्रक्रियाकौमुदीकारोऽपि कैयटमनुसरन् "खारी। द्रोणः। आढकम्" इत्येव परिमाणग्रहणस्य उदाहरणानि प्रादर्शयत्।अत एव प्रक्रियाकौमुदीकारमतं विवृण्वता प्रकाशटीकाकारेण श्रीकृष्णेन प्रोक्तं– "ननु द्रोणादिशब्दानां परिमाणं प्रातिपदिकार्थ एव। सत्यम्, यदा तु द्रोणादयो द्रोणादिपरिमिते व्रीह्यादौ वर्तन्ते, तदा तस्य व्यभिचाराद् न प्रातिपदिकार्थत्वम्। ते हि लौहं दारुमयं परिमाणमेव न व्यभिचरन्ति" (प्रक्रियाकौमुदी [प्रकाशः], द्वितीयो भागः, पृष्ठम्– ४) इति।

### २.२. दीक्षितमतिः

"द्रोणः खारी आढकमित्यत्रापि यथा स्यात्" इति भाष्यवचनस्य तात्पर्यमन्यथैवाविष्करोति दीक्षितः। तदुक्तं प्रौढमनोरमायां– "न च प्रातिपदिकार्थमात्रे प्रथमेहास्त्विति वाच्यम्, तथा सति परिच्छेद्यपरिच्छेदकभावस्य संसर्गविधया भानायोगात्, नामार्थयोर-भेदसंसर्ग एव व्युत्पत्तेः" (प्रौढमनोरमा, पृष्ठम् - ६१२-६१३) इति । दीक्षितस्यायमाशयः–

यदि द्रोणशब्दात् प्रातिपदिकार्थमात्रे प्रथमा इति प्रथमवाक्येन प्रथमा विधीयते तर्हि स्वार्थे प्रथमाविधानात्प्रथमाविभक्त्यर्थः अपि प्रातिपदिकार्थः अर्थात् नामार्थः स्यात्। एवञ्च नामार्थस्य परिमाणविशेषस्य व्रीहिपदार्थेन साकम् अभेदेनान्वयप्रसङ्गः स्यात्। तेन यथा नीलो घटः इत्यस्मात् नीलाभिन्नो घटः इति बोधो जायते तथा द्रोणो व्रीहिरित्यस्मादपि द्रोणाभिन्नो व्रीहिरिति बोधापत्तिः स्यात्, नामार्थयोरभेदातिरिक्तः सम्बन्धोऽव्युत्पन्नः इति न्यायस्य जागरूकत्वात्।

ननु चित्रगुरित्यादिषष्ठ्यर्थबहुव्रीहिस्थले चित्ररूपनामार्थस्य अभेदेन गोरूपनामार्थे अन्वयात् चित्राभिन्नगोस्वामी इति बोधो भवति इति पूर्वोक्तव्युत्पत्तेर्व्यभिचाराभावेऽपि प्राप्तोदको ग्रामः इत्याद्यषष्ठ्यर्थबहुव्रीहिस्थले भवत्येव व्यभिचारः। तथाहि– प्राप्तम् उदकं यम् इति विग्रहवाक्यात् यत्कर्मकप्राप्तिकर्तृ उदकमिति बोधः, समासाच्च उदकर्तृकप्राप्तिकर्म इति बोधः। तत्र विग्रहे यद्यपि प्राप्तिकर्तुरभेदेन उदके अन्वयस्तथापि समासे तु उदकस्य प्राप्तौ कर्तृतया अन्वयेन व्यभिचारः स्फुट एव। एवञ्च न द्रोणाभिन्नो व्रीहिरिति बोधापत्तिरिति चेन्न। एकार्थीभावस्याश्रयणात् न तत्र व्यभिचारः। पृथक्पृथक् अर्थोपस्थापकानां पदानाम् एकोपस्थितिविषयत्वमेव हि एकार्थीभावत्वम्। एवञ्च एकार्थीभावसामर्थ्यात् एकैवोपस्थितिः, व्युत्पत्तिस्तु भिन्नरूपेण उपस्थितनामार्थविषये इति न क्लेशः।

ननु व्यपेक्षापक्षेऽपि न क्लेशः। उदकस्य कर्तृतया प्राप्तौ अन्वये खलु व्यभिचारः। तद्रीत्या अन्वयमेव न कुर्मः। तथाहि– प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थस्यैव प्राधान्यम् इति नियमो वर्तते। तस्मात् पाचकः इत्यादौ प्रकृत्यर्थभूता पाकक्रिया ण्वुल्प्रत्ययार्थभूते कर्तरि विशेषणीभूता, तेन च पाककर्ता इति बोधो जायते। बोधेऽस्मिन् प्रत्ययार्थस्य प्राधान्यं स्पष्टमेव। परन्तु अस्य सिद्धनियमस्य परित्यागः पचति इति तिङन्तस्थले दृश्यते। तत्र तिप्रत्ययार्थः कर्ता प्रकृत्यर्थे पाके विशेषणतया अन्वेति, ततश्च कर्तृत्वविशिष्टः पाकः इति बोधो जायते। एवञ्च यद्यपि कृदन्ततद्धितान्तजन्यबोधे प्रकृत्यर्थो विशेषणतया प्रत्ययार्थश्च विशेष्यतया भासते तथापि तिङन्तजन्यबोधे प्रत्ययार्थो विशेषणतयैव अर्थात् प्रत्ययार्थनिष्ठप्रकारतानिरूपिता प्रकृत्यर्थनिष्ठविशेष्यता भवति। तथैव प्रपूर्वक-आप्धातोः कर्तरि क्तप्रत्यये प्राप्तपदं व्युत्पद्यते। अतोऽत्र क्तप्रत्ययार्थस्य कर्तुः वृत्तित्वसम्बन्धेनप्राप्तिक्रियायाम् अन्वयं सम्पादयामः अर्थात् विशेष्यविशेषणवैपरीत्यं कुर्मः। तेन च कर्तृवृत्तिप्राप्तिरिति बोधो जायेत। ततश्च उदकनामार्थस्य अभेदेन विशेषणीभूतकर्तृपदार्थे अन्वयेन उदकाभिन्नकर्तृवृत्तिप्राप्तिकर्म इति बोध उपपद्येत। किञ्च विशेष्यविशेषणवैपरीत्यं न केवलं व्यपेक्षावादिभिरेव कल्प्यते अपि तु एकार्थीभाववादिभिरपि। प्राप्तोदकमित्यत्र ग्रामकर्मकप्राप्तिकर्तृ उदकमिति विग्रहवाक्यजन्यबोधे उदकस्य मुख्यविशेष्यतया भानम्, उदककर्तृकप्राप्तिकर्मेति समासजन्यबोधे उदकस्य विशेषणतया भानमिति विशेष्यविशेषणव्यत्यासः स्फुट एव। एवञ्च उदकस्य अभेदेन प्राप्तौ अन्वयात् कर्तृतया अनन्वयात् न व्यभिचारः इति चेन्न। नामार्थयोरभेदः संसर्गः इत्यत्र नामार्थशब्दस्य नामजन्य-प्रतीतिविशेष्यत्वमर्थः। ततश्च नामजन्यप्रतीति-विशेष्ययोरभेदः संसर्गः इति अर्थः फलति। एवञ्च नामजन्यप्रतीतिविशेष्यताधुना कर्तृविशिष्टप्राप्तिक्रियायां वर्तते इत्यतः प्राप्तिक्रियायामेव उदकनामार्थस्य अन्वयो वक्तव्यः, स च भवता न विहितः इति व्यभिचारस्तदवस्थ एव। नामार्थशब्दस्य तादृशार्थकल्पनं च अवश्यं करणीयम् अन्यथा उदकशब्दस्य विशेषणीभूतपदार्थैकदेशे अन्वयो वक्तव्यः, तथा सति पदार्थः पदार्थेनान्वेति, न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधः स्यात्। सा च व्युत्पत्तिः नित्यपदार्थस्य घटत्वान्वयविवक्षया प्राप्तस्य नित्यो घटः इत्यादिप्रयोगस्य वारणाय अवश्यमभ्युपेया इति गले पतितः तादृशार्थस्वीकारः। यद्यपि राज्ञः पुरुषः इत्यादौ नामजन्यबोधविशेष्ययोर्भेदसम्बन्धेन अन्वयो दृश्यते तथापि यत्र सामानाधिकरण्यं तत्र अभेदेनैव। अन्यथा राजा पुरुषः इति वाक्यादपि स्वत्वसम्बन्धावच्छिन्नराजनिष्ठप्रकारताकबो-धापत्तिः स्यात्। सामानाधिकरण्ये च बहुव्रीहिसमासो भवति, अतः तत्र अभेदेनान्वयो वक्तव्यः, स च न सम्भवति इति व्यभिचारः स्पष्ट एव।

किञ्च पचति इत्यत्र प्रत्ययार्थस्य प्राधान्यत्यागदर्शनात् प्राप्तशब्देऽपि क्तप्रत्ययार्थस्य प्राधान्यत्यागप्रतिपादनमपि न युक्तम्।

यतोहि पचति इत्यत्र तिङ् कर्त्रर्थस्य द्योतको न तु वाचकः, श्रूयमाणानाम् अनेकतिबादीनां कर्त्रादौ शक्तिकल्पनापेक्षया तत्प्रकृतिभूतैकानुपूर्व्यवच्छिन्नधातोरेव क्रियात्व-क्रिया-काल-कारक-संख्यारूपेषु पञ्चसु अर्थेषु शक्तिः कल्प्यते, लाघवात्। एवं तिङां द्योतकता, काल इव द्योत्यः कर्ता इति अस्तु द्योत्यस्य कर्तृरूपार्थस्य विशेषणता। द्योत्यार्थस्य विशेषणता च हेतुमति च (अष्टा.- ३.१.२६) इति सूत्रभाष्ये स्पष्टा। अत एव टाबादिस्त्रीप्रत्ययद्योत्यस्य स्त्रीत्वस्य विशेषणत्वम् उपपद्यते। यत्र तु प्रत्ययवाच्यता तत्र विशेष्यतैव। कर्तरि कृत् (अष्टा.- ३.४.६७) इति सूत्रैकवाक्यतया गत्यर्थाकर्मक... इत्यादिसूत्रेण कर्तरि क्तप्रत्ययस्य विधानात्, तस्य विशेष्यत्वमेवोचितम्। अतः पूर्वोक्तव्याख्यानमेव अयुक्तमिति मन्तव्यम्।

केचन पूर्वोक्तव्याख्यानमन्यथा दूषयन्ति। ते वदन्ति यत् पूर्वोक्तरीत्या अन्वयेन उदकाभिन्नकर्तृविशिष्टप्राप्तिकर्मेति बोधः, स च उदककर्तृकप्राप्तिकर्मेति अनुभवसिद्धशाब्दबोधाद् भिन्नः, किञ्च प्रत्ययार्थप्राधान्यत्यागः कल्पनीयः तदपेक्षया क्तप्रत्ययस्य कर्मणि लक्षणां स्वीकुर्मः। ततश्च प्राप्तशब्दस्य प्राप्तिकर्मेति अर्थः स्यात्, तत्र विशेषणीभूतप्राप्तौ उदकस्य कर्तृतया अन्वये उदककर्तृकप्राप्तिकर्मेति बोधः उपपद्यते इति न दोषः इति चेन्न। इदं व्याख्यानमपि न युक्तम्, अन्यपदार्थे हि बहुव्रीहिसमासो विधीयते, अत्र कर्मरूपान्यपदार्थस्य क्तप्रत्ययेनैव लाभात् अन्यपदार्थस्य दुरुपपादत्वं स्यात्।

अतः एकार्थीभावोऽभ्युपगन्तव्यः इति फलितम्। तथा सति न व्युत्पत्तेर्व्यभिचारः, न अनुभवसिद्धशाब्दबोधाभावापत्तिः, न अन्यपदार्थस्य दुरुपपादत्वापत्तिरिति बोद्ध्यम्। एकार्थीभावाभ्युपगमादेव राजपुरुषः इत्यत्र राजपदार्थस्य पुरुषपदार्थे स्वस्वामिभावेन अन्वयात् व्युत्पत्तेर्व्यभिचारं प्रतिपादयितारः, राजपदार्थस्य राजसम्बन्धिनि लक्षणामभ्युपगम्य अभेदेन पुरुषे अन्वयं सम्पाद्य व्युत्पत्तेर्व्यभिचारं वारयितुं न शक्यते, सम्बन्धिनि लक्षणायां प्रमाणाभावादिति मन्तारः परास्ताः। एकार्थीभावाभ्युपगमे हि व्युत्पत्तेर्विषय एव नास्ति, एकोपस्थितित्वादिति पूर्वमुपपादितम्।

निपाता द्योतका इत्यभ्युपगमात् घटश्च इत्यादौ समुच्चयस्य घटे अवयवावयविरूपभेदसम्बन्धेनान्वयात् व्युत्पत्तेर्व्यभिचाराशङ्कापि निरस्ता भवति। यतोहि तेषां द्योतकत्वात् घटशब्दादेव विशिष्टार्थस्योपस्थितिरतः न व्युत्पत्तिभङ्गः। अथवा लक्षणे निपातातिरिक्तविशेषणदाने अर्थात् निपातातिरिक्तनामार्थयोरभेदः संसर्गः इति व्युत्पत्तिस्वीकारे न व्यभिचारप्रसङ्गः।

एवञ्च द्रोणो व्रीहिरित्यत्र अभेदान्वयः प्राप्तः, स च नेष्टः, प्रतीतिविरोधादिति पूर्वमेव प्रतिपादितम्। अतः सूत्रे परिमाणग्रहणम्। कृते च परिमाणग्रहणे प्रातिपदिकात् परिमाणार्थे प्रथमा भवति। यस्मिन् अर्थे यो विधीयते स तदर्थः इति रीत्या परिमाणार्थे प्रथमाविधानात् परिमाणं प्रत्ययार्थः। एवञ्च द्रोणो व्रीहिरित्यत्र द्रोणशब्दस्य परिमाणविशेषोऽर्थः, सुप्रत्ययस्य च परिमाणसामान्यमर्थः। ततश्च "सामान्यविशेषयोरभेदान्वयः" इति व्युत्पत्त्यनुरोधेन अभेदान्वये कृते द्रोणाख्यपरिमाणविशेषाभिन्नं परिमाणसामान्यमित्यर्थो जायते। ननु पचतीत्यत्र कर्तृवृत्तिः पाकः, पाचक इतीह पाककर्ता, औपगव इत्यत्र उपग्वपत्यम् इति प्रकृतिप्रत्ययार्थयोरभेदेन अन्वयादर्शनात् द्रोणाख्यपरिमाण-विशेषाभिन्नं परिमाणसामान्यमिति असङ्गतमिति चेन्न, देवतार्थकतद्धितादौ ऐन्द्रं हविः इत्यादौ इन्द्राभिन्नदेवताकं हविः इति अभेदान्वयदर्शनात् न काचिद् विप्रतिपत्तिरिति बोद्ध्यम्। ततश्च नामार्थप्रत्ययार्थयोर्भेदेन अन्वयस्य राज्ञः पुरुषः इत्यादौ ङसर्थस्य स्वत्वस्य स्वस्वामिभावस्य वा पुरुषे अन्वयदर्शनात् प्रत्ययार्थस्य परिमाणसामान्यस्य परिच्छेद्यपरिच्छेदकभावसम्बन्धेन व्रीहौ अन्वयः। तथा च द्रोणाख्यपरिमाणविशेषाभिन्नं यत्परिमाणसामान्यं तत्परिच्छिन्नो व्रीहिरिति बोधो जायते। तदीरितं सिद्धान्तकौमुद्यां– "द्रोणरूपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः" (वैयाकरणसिद्धान्तकौमुदी (प्रथमो भागः), पृष्ठम् - ५९४-५९५) इति।

यद्यपिप्रातिपदिकार्थमात्रे प्रथमा विधीयते चेद् द्रोणाभिन्नो व्रीहिरिति प्रतीतिर्न स्यात्, अपि तु द्रोणाख्यपरिमाणविशेषस्य अभेदेन मेये व्रीहौ अन्वयबाधात् द्रोणपदस्य द्रोणाख्यपरिमाणविशेषपरिच्छिन्ने लक्षणास्वीकारेण द्रोणाख्य-परिमाणविशेषपरिच्छिन्नाभिन्नो व्रीहिरिति बोधः स्यात् तथापि परिमाणसामान्यं न प्रतीयेत। अर्थात् पूर्वोक्तरीत्या परिमाण-सामान्यस्य परिच्छेद्यपरिच्छेदकभावसम्बन्धेन व्रीहौ अन्वये यो विलक्षणः परिमाणसामान्यघटितशाब्दबोधः सिद्ध्यति, स न स्यात्। एवञ्च **शाब्दबोधवैलक्षण्याय** परिमाणग्रहणमिति दीक्षितहृदयम्।

ननु राज्ञः पुरुषमानयेतिवत् यत्र भेदसम्बन्धेनान्वयो भवति तत्र समानविभक्तिकत्वं नापेक्षते, अभेदान्वयस्थले एव समानविभक्तिकत्वस्य तन्त्रत्वात्। तथा च द्रोणस्य व्रीहौ भेदान्वये सति द्रोणो व्रीहिमानय इति प्रयोगस्यापि साधुत्वापत्तिः स्यादिति चेन्न अभेदेन प्रकृत्यर्थान्वितः प्रत्ययार्थो यत्र भेदेनापि पदार्थान्तरान्वयी तत्रापि समानविभक्तिकता इति व्युत्पत्तेरङ्गीकारान्न दोषः। राज्ञः पुरुषम् इत्यत्र अभेदेन नृपरूपप्रकृत्यर्थान्वितः ङस्प्रत्ययार्थः सम्बन्धो न विद्यते इति हेतोरत्र समानविभक्तिकत्वाभावेऽपि द्रोणो व्रीहिरित्यत्र तु अभेदेन परिमाणविशेषरूपप्रकृत्यार्थान्वितः प्रत्ययार्थः परिमाणसामान्यं विद्यते, अतः अत्र परिमाणसामान्यरूपप्रत्ययार्थस्य भेदसम्बन्धेन धान्यरूपपदार्थान्तरेण अन्वयेऽपि समानविभक्तिकता अपेक्षते इति न काचिद् विप्रतिपत्तिः। अत एव कृष्णादिप्रातिपदिकात्परिमाणार्थे प्रथमायां 'कृष्णो व्रीहिः' इति प्रयोगापत्तिर्नास्ति। अन्यथा प्रत्ययार्थे

परिमाणे समानकालिकत्वादिना प्रकृत्यार्थान्वये प्रत्ययार्थस्य च परिच्छेद्यपरिच्छेदकभावसम्बन्धेनान्वये बाधकाभावात् तादृश-प्रयोगापत्तिः स्यादिति बोद्ध्यम्।

### २.३. नागेशनिर्णीतिः

द्रोणः, आढकम् इत्यादिपरिमाणवाचकशब्देभ्यः प्रथमाविधानार्थं सूत्रे परिमाणग्रहणम्। परिमाणमात्राधिक्ये प्रथमा इति तृतीयवाक्यस्य अर्थस्तावत्– परिमाणाधिक्ये वर्तमानात् प्रातिपदिकात् प्रथमा इति। द्रोणादिशब्दात् प्रातिपदिकार्थापेक्षया परिमाणस्याधिक्येन भानात् प्रातिपदिकार्थमात्रे प्रथमा न सिद्ध्यति। ननु परिमाणविशेषवाचिभ्यो द्रोणादिभ्यो नियततया परिमाणार्थो भासते, अतो नियतोपस्थितिकत्वेन प्रातिपदिकार्थत्वात् प्रथमवाक्येनैव प्रथमा सिद्ध्यति इति चेन्न। प्रवृत्तिनिमित्तं तदाश्रयश्च प्रातिपदिकार्थः। अत एव वृत्तिकृता "प्रातिपदिकार्थः सत्ता" (काशिका (तृतीयो भागः), पृष्ठम् - ५६) इत्युक्तम्। सत्ता तदाश्रयस्यापि उपलक्षणम्। अत्र प्रातिपदिकार्थपदेन द्विकं प्रातिपदिकार्थ एव गृह्यते, अत एव भाष्यकृता लिङ्गग्रहणस्य फलरूपेण वृक्षशब्दः उदाहृतः ("इदं तर्हि– कुमारी वृक्षः कुण्डमिति"– महाभाष्यम् द्वितीयो भागः, पृष्ठम् - ५१३) । यदि नियतोपस्थितिक एव प्रातिपदिकार्थः स्यात् तर्हि वृक्षशब्दात् पुंस्त्वस्य नियततया भानात् प्रातिपदिकार्थस्यैव उदाहरणरूपेण प्रस्तुतः स्यात्। एवञ्च द्रोणपदात् द्रोण-द्रोणत्वापेक्षया परिमाणस्याधिक्येन भानात् न प्रथमवाक्येन सिद्धिः। अतः परिमाणग्रहणम्।परिमाणग्रहणस्य उदाहरणम्– द्रोणः इत्येव न तु द्रोणो व्रीहिरित्यपि फलितम्।अत एव भाष्यकृता द्रोणादिशब्दा एव परिमाणग्रहणस्योदाहरणरूपेण प्रस्तुताः–"द्रोणः खारी आढकमित्यत्रापि यथा स्यात्" इति। तत्र लिङ्गस्य यथा द्रोणत्वावच्छिन्ने द्रोणादिशब्दजन्यप्रतीतौ विशेषणतया भानं तथा परिमाणस्यापि विशेषणतया भानम् इति बोद्ध्यम्।

ननु प्रवृत्तिनिमित्तं तदाश्रयश्च प्रातिपदिकार्थश्चेत् द्रोणादिशब्दात् प्रातिपदिकार्थमात्रे एव प्रथमा अस्तु, द्रोणत्वाखण्डो-पाधिसमानाधिकरणत्वेन प्रतीयमानस्यइयत्ताविशेषावच्छिन्न-पलादिपरिमितव्रीह्यादिपरिच्छेदकत्वस्य प्रवृत्तिनिमित्तत्वेन ग्रहणात् । अर्थात् परिच्छेदकरूपार्थस्य प्रवृत्तिनिमित्ते एव अन्तर्भूतत्वात् प्रातिपदिकार्थे एव प्रथमा स्यादिति चेन्न। लाघवात् लघुधर्मसमनियतगुरुधर्मस्य ग्रहणमत्र प्रवृत्तिनिमित्तत्वेन न भवति। अत्र लघुधर्मस्य द्रोणत्वस्य प्रवृत्तिनिमित्तत्वसम्भवे तत्समनियतस्य इयत्ताविशेषावच्छिन्नपलादिपरिमितव्रीह्यादिपरिच्छेदकत्वस्य प्रवृत्तिनिमित्तत्वेन ग्रहणं न भवति इति भावः। एवञ्च परिमाणार्थस्य आधिक्येन भानात् परिमाणाधिक्ये **प्रथमासिद्ध्यर्थं** कर्तव्यमेव परिमाणग्रहणमिति फलितम्।

ननु द्रोणत्वावच्छिन्ने परिमाणस्याभेदेन विशेषणत्वात् द्रोण इत्यस्मात् शब्दात् परिमाणाभिन्नो द्रोण इति बोधो जायते। ततश्च उक्तार्थानामप्रयोगः इति न्यायस्य जागरूकत्वात् द्रोणः परिमाणमित्यादिप्रयोगो न स्यात् इति चेन्न। द्वौ ब्राह्मणौ इत्यस्य यथा सिद्धिरत्रापि तथा स्यादिति अदोषः। तथाहि यथा ब्राह्मणपदोत्तरद्विवचनेन द्वित्वस्य उपस्थितौ अपि तदनुवादकत्वेन द्विशब्दस्य प्रयोगस्तथा परिमाणस्य द्रोणशब्दार्थत्वे अपि तदनुवादकतया परिमाणशब्दप्रयोगः इति द्रोणः परिमाणम् इति प्रयोगः सुष्ठु उपपद्यते। तदुक्तं मणिकारेण–"सम्भेदे नान्यतरवैयर्थ्यम्" इति। तत्र सम्भेदे इत्यस्य एकस्यैवार्थस्य शब्दद्वयेन बोधने इत्यर्थः। अथवा द्रोणशब्दस्य अश्वत्थामजनककाकादिबह्वर्थवाचकत्वेन सन्देहाद् इतरार्थनिवृत्त्यर्थं परिमाणशब्दप्रयोगः इति बोद्ध्यम्। तदुक्तं लघुशब्देन्दुशेखरे–"द्रोणः परिमाणमित्येष तु द्वौ ब्राह्मणा-वितिवत्प्रयोगः, द्रोणशब्दस्यानेकार्थत्वाद्वा" (लघुशब्देन्दुशेखरः, पृष्ठम्-४२९) इति।

एवं परिमाणार्थे वर्तमानात् द्रोणशब्दात् स्वार्थे एव प्रथमा इति फलितम्। नन्वेवं सति द्रोणो व्रीहिरिति वाक्यस्य साधुत्वं कथं स्यात्, नामार्थयोरभेदेनान्वयप्रसङ्गात्, अभेदान्वयस्य च प्रतीति-विरोधादिति चेत्समाधायि नागेशेन लघुशब्दरत्ने–"द्रोणो व्रीहिरिति तु 'सिंहो माणवकः' इतिवल्लक्षणया साधु" (प्रौढमनोरमा, लघुशब्दरत्नम्, पृष्ठम्- ६२०) इति । अर्थात् सिंहो माणवकः इत्यादौ यथा लक्षणया इष्टशाब्दबोधस्तथा द्रोणशब्दस्य द्रोणपरिमिते लक्षणा, ततस्तस्य अभेदेन व्रीहावन्वये द्रोणपरिमिताभिन्नो व्रीहिरिति बोध उपपद्यते। शक्यतावच्छेदकारोपो लक्षणा इति पक्षे शक्यतावच्छेदकस्य द्रोणत्वस्य व्रीहौ आरोपो भवति, ततः आरोपितद्रोणत्ववान् व्रीहिरिति बोधो वा स्यात् इति न क्लेशः। लक्षणा च पदे एव भवति। अतः अन्तरङ्गत्वादादौ प्रथमाविभक्तिविधानमनन्तरञ्च माणवकादिपदसमभिव्याहारे लक्षणा, सा च बहिरङ्गभूता। तदानीं लक्षणया सदृशार्थोपस्थितौ अपि न क्लेशः, भुक्तवन्तं प्रति मा भुङ्क्थाः इति न्यायेन प्रथमाविभक्तेरनिवर्तनादिति सर्वं सङ्गतम्।

### ३. समीक्षणम्

एवं कैयटमते परिमेयाधिक्ये वर्तमानात् प्रातिपदिकात्स्वार्थे प्रथमाविधानार्थं परिमाणग्रहणम्, दीक्षितमते प्रातिपदिकार्थे वर्तमानात्प्रातिपदिकात् परिमाणार्थे प्रथमाविधानार्थं परिमाणग्रहणं, नागेशमते परिमाणाधिक्ये वर्तमानात् प्रातिपदिकात्स्वार्थे प्रथमाविधानार्थं परिमाणग्रहणमिति फलितम्।

पूर्वविहितपरामर्शेन कैयटमते प्रातिपदिकार्थसूत्रस्यार्थो भवति– प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्य परिमाणमात्राधिक्ये वचनमात्रे च प्रथमा भवति। दीक्षितमते– प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे वचनमात्रे च प्रथमा भवति। नागेशमते– प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाण-

मात्राधिक्ये वचनमात्रे च प्रथमा भवति। तत्र अलिङ्गेभ्यो नियतलिङ्गेभ्यश्च प्रथमाविधानार्थं प्रातिपदिकार्थमात्रे प्रथमा इति वाक्यम्। अनियतलिङ्गेभ्यः प्रथमाविधानार्थं लिङ्गमात्राधिक्ये प्रथमा इति द्वितीयं वाक्यम्, केवललिङ्गस्य प्रातिपदिकार्थं विना कुत्रापि अनुपस्थितेः अधिकस्य ग्रहणम्। एतच्च कैयटदीक्षितयोस्तुल्यम्। परिमेयार्थसङ्ग्रहाय परिमेयार्थपर-परिमाणशब्दग्रहणमिति कैयटमतिः। परिमेयार्थश्च प्रातिपदिकार्थं विना न क्वचिदुपस्थीयत इत्यतः अत्रापि अधिकग्रहणं करणीयम्। ततश्च परिमाणमात्राधिक्ये प्रथमा इति तृतीयं वाक्यमिति फलति। दीक्षितस्तु इष्टशाब्दबोधाय परिमाणग्रहणमित्यभिप्रैति। किञ्च कैयटमते स्वार्थे एव प्रथमा, किन्तु दीक्षितमते परिमाणार्थे प्रथमा। अतः अधिकग्रहणं न करणीयम्। परिमाणमात्रे प्रथमा इति तृतीयं वाक्यं फलति। अतः "प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये संख्यामात्रे च प्रथमा स्यात्" (वैयाकरणसिद्धान्तकौमुदी, प्रथमो भागः, पृष्ठम्- ५९२-५९३) इति गिरिधरशर्मणा परमेश्वरानन्दशर्मणा सम्पादिताया वैयाकरणसिद्धान्तकौमुद्याः प्रथमखण्डे प्रातिपदिकार्थसूत्रस्थवृत्तिग्रन्थस्य यः पाठः स न युक्तः। तस्य ग्रन्थस्य यद्व्याख्यानं बालमनोरमायां दृश्यते– "लिङ्गमात्राद्याधिक्य इति। लिङ्गमात्राधिक्ये परिमाणमात्राधिक्ये चेत्यर्थः" (वैयाकरणसिद्धान्तकौमुदी [बालमनोरमा], प्रथमो भागः, पृष्ठम्- ५९३) इति तदपि भ्रान्तम्। न हि परिमाणाधिक्ये प्रथमा विधीयते अपि तु परिमाणमात्रे एव। सः अर्थः कैयटमते नागेशमते यद्यपि सङ्गच्छते, दीक्षितमते तु नैव सङ्गच्छते। अतः प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे वचनमात्रे च प्रथमा भवति इति सूत्रार्थो दीक्षितमते वक्तव्यः। दृश्यते च युक्तः पाठो बालकृष्णशर्मपञ्चोलिना सम्पादिताया वैयाकरण-सिद्धान्तकौमुद्या द्वितीयांशे–"प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात्" (वैयाकरणसिद्धान्तकौमुदी [लक्ष्मीव्याख्यासहिता], द्वितीयोंऽशः, पृष्ठम्- ७६९) इति।

"द्रोणः खारी आढकमित्यत्रापि यथा स्यात्" इति द्रोणः, खारी, आढकम् इत्यत्र द्रोणादीनां मेयवृत्तित्वे अपि यथा प्रथमा स्यात् इति भाष्यवचनस्यार्थः इति कैयटव्याख्यानात्प्रतीयते। अर्थात् परिमाणवाचकशब्दा लक्षणया यदा परिमेयार्थे वर्तन्ते तदा परिमेयरूपलक्ष्यार्थसङ्ग्रहाय परिमाणग्रहणमिति कैयटेन प्रत्यपादि। तन्नरमणीयम्। तत्र युक्तयः–

१) व्याख्यानेऽस्मिन् भाष्ये परिमाणग्रहणस्य उदाहरणरूपेण द्रोणादिशब्दानामेव उपन्यासात् व्रीह्यादिपदानाम-नुपादानात् न्यूनता स्फुटा।

२) द्रोणः खारी आढकमित्यत्रापि यथा स्यात् इत्यत्र मेयवृत्तित्वे इति अध्याहार्यं भवति। ततः द्रोणः खारी आढकमित्यत्र मेयवृत्तित्वे अपि यथा स्यात् इति अर्थः कल्पनीयः।

३) परिमेयार्थरूपलक्ष्यार्थसङ्ग्रहाय परिमाणग्रहणे कृते सिंहो माणवकः इत्यादौ सदृशार्थस्य आधिक्येन भानात् सिंहादिशब्दात् प्रथमा न स्यादिति सूत्रकारस्य भाष्यकारस्य सिंहो माणवक इत्यादेरज्ञानकल्पना च कर्तव्या इति आपतति।

४) यदि चोच्यते यत् परिमाणग्रहणं लक्ष्यार्थोपलक्षणम्। उपलक्षणमर्थात् स्वबोधकत्वे सति स्वेतरबोधकत्वम् इति परिमाणग्रहणेन समेषां लक्षणस्थलानां सङ्ग्रहः स्यादिति चेत् पदे एव लक्षणा इति पक्षे परिमाणग्रहणस्य वैयर्थ्यापत्तिः स्यात्।

अतः कैयटमतं न युक्तमिति आपतितम्। अतः कैयटमतमुपेक्ष्य शाब्दबोधवैलक्षण्याय परिमाणग्रहणमिति दीक्षितोऽभिप्रैति। एवञ्च दीक्षितमते"द्रोणः खारी आढकमित्यत्रापि यथा स्यात्" इति भाष्यस्य द्रोणः खारी आढकमित्यत्र विभक्त्यर्थस्य परिमाणस्य परिच्छेद्य-परिच्छेदकभावेन व्रीह्यादौ मेयेऽन्वयो यथा स्यादिति अर्थः फलति।अतो लक्षणाऽसङ्ग्रहरूपो दोषो नास्ति। यतो हि दीक्षितमते पदे एव लक्षणा, अतः प्रथमवाक्यद्वयेनैव लक्षणास्थले प्रथमा स्यात्। एवञ्च शाब्दबोधमात्रवैलक्षण्याय परिमाणग्रहणमिति दीक्षितहृदयम्। परन्तु मतमिदं समर्थ्यते चेत् केचन दोषाः समापतन्ति। तथाहि–

१) यत्र भेदसम्बन्धेनान्वयो भवति तत्र समानविभक्त्यन्तत्वं नापेक्षते, यथा– राज्ञः पुरुषमानय इति। तथा द्रोणो व्रीहिरित्यत्र भेदान्वये सति द्रोणो व्रीहिमानय इति प्रयोगापत्तिः स्यात्।

२) यदि चोच्यते यत् तादृशप्रयोगवारणाय अभेदेन प्रकृत्यर्थान्वितः प्रत्ययार्थो यत्र भेदेनापि पदार्थान्तरान्वयी तत्रापि समानविभक्तिकता इति व्युत्पत्तेरङ्गीकारान्न दोषः इति चेत् तादृशवचनकल्पनं गौरवाय भवति।

३) भाष्ये परिमाणग्रहणस्य द्रोणः खारी इत्यादीनि एव उदाहरणानि प्रदत्तानि, न तु द्रोणो व्रीहिरिति। एवञ्च व्रीह्यादिपदानुपादानात् न्यूनता।

४) तिङ्समानाधिकरणे प्रथमा इति वार्तिकेन सह विरोधः स्यात्। यतोहि वार्तिकस्यास्य प्रातिपदिकार्थसूत्रेणैकवाक्यतया तिङ्समानाधिकरणो यः प्रातिपदिकार्थः तस्मात् प्रथमा इत्यर्थो भवति। तिङ्सामानाधिकरण्यञ्च तिङर्थाभिन्नार्थाभिधायकत्वम्। यथा– देवदत्तः अस्ति इत्यत्र तिङर्थः कर्ता, स एवार्थो देवदत्तशब्दोत्तरप्रथमायाः, अभिन्नार्थाभिधायकत्वेन सामाना-धिकरण्यं स्पष्टम्। किन्तु द्रोणो व्रीहिरस्ति इत्यत्र द्रोणपदोत्तरप्रथमायाः परिमाणमर्थः, तिङर्थश्च कर्ता इति सामानाधिकरण्याभावात् तिङ्समानाधिकरणे प्रथमा इति वार्तिकविरोधः स्फुट एव।

५) परिमाणं प्रत्ययार्थः इति गृह्यमाणे प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्च इति प्रातिपदिकार्थ-लिङ्गपरिमाणवचनानि इति यो द्वन्द्वसमासः, स नोपपद्येत, सहविवक्षायां द्वन्द्वविधानात्। सहविवक्षा च – एकधर्मा-वच्छिन्नस्यैकधर्मावच्छिन्ने एकधर्मा-वच्छिन्नसंसर्गेणान्वयरूपा। प्रातिपदिकार्थलिङ्गवचनानि प्रातिपदि-कार्थत्वधर्मावच्छिन्नानि, परिमाणञ्च प्रत्ययार्थत्व-धर्मावच्छिन्नम् इति एकधर्मा-वच्छिन्नत्वाभावेन सहविवक्षाया अभावाद् द्वन्द्वाभावः स्यात्।

६) परिवृतो रथः (अष्टा.- ४.२.१०) इत्यधिकारपठितस्य पाण्डुकम्बलादिनिः (अष्टा.- ४.२.११) इति सूत्रस्य भाष्ये भाषितं भाष्यकृता–"अयं योगः शक्योऽवक्तुम्। कथम्– पाण्डुकम्बली, पाण्डुकम्बलिनौ, पाण्डुकम्बलिन इति। इनिनैतन्मत्वर्थीयेन सिद्धम्। पाण्डुकम्बलोऽस्यास्तीति - पाण्डुकम्बली" (महाभाष्यम्, चतुर्थो भागः, पृष्ठम्- १६४) इति। मत्वर्थीयेनेनिनैव सिद्धे पुनरिनिविधानं व्यर्थमिति कथनं सूचयति यत् शब्दशास्त्रे केवलशाब्दबोधवैलक्षण्याय न किञ्चिदुपादीयते। अन्यथा परिवृतार्थे विधाने पाण्डुकम्बलेन परिवृतः इति बोधः, मत्वर्थीये तु पाण्डुकम्बलमस्यास्तीति बोधः इति शाब्दबोधवैलक्षण्यस्य सुस्पष्टत्वाद् भाष्यकारस्य आक्षेपो निरर्थकः स्यात्। अत एव औपगव इत्यादौ तस्येदम् (अष्टा.- ४.३.१२०) इत्यणि सिद्धे तस्यापत्यम् (अष्टा.-४.१.९२) इति सूत्रं किमर्थमिति जिज्ञासायां–"बाधनार्थं कृतं भवेत्" (महाभाष्यम्, चतुर्थो भागः, पृष्ठम्- ११७) इति समाधानदानं सङ्गच्छते, यतो हि पूर्वसूत्रेण इदन्त्वेन बोधः, अनन्तरेण च अपत्यत्वेन बोधः इति बोधवैलक्षण्यस्य स्फुटत्वात् तादृशप्रश्नोत्तरं व्यर्थं स्यात्।

एवञ्च शाब्दबोधवैलक्षण्याय परिमाणग्रहणमिति स्वीकारे सूत्रकारमते परिमाणग्रहणस्य सार्थक्यं कथञ्चिदपि उपपादयितुं न शक्यते। किञ्च द्विकं प्रातिपदिकार्थः इति शास्त्रप्रसिद्धपक्षाश्रयणेनैव सिद्धे नियतोपस्थितिकत्वं प्रातिपदिकार्थः इति नियमांशनिवेशे क्लिष्टकल्पनैव भवति। किञ्च घट इत्यादावपि तत्तद्घटव्यक्तीनां भाने नियमाभावात् कदाचित्काचिद्व्यक्तिः कदाचित्सर्वा व्यक्तयो भासन्ते इति अनुभवसिद्धः। किञ्च अनियतलिङ्गस्थले नियततया लिङ्गं न भासते, प्रथमाविभक्तियोगे एव भासते, तथा सति द्वितीयाद्यन्ते कथं लिङ्गबोधः? अत प्रवृत्तिनिमित्ततदाश्रययोरेव प्रातिपदिकार्थपदेन ग्रहणं युक्तम् इति बोद्ध्यम्। ततश्च परिमाणे वर्तमानात्प्रातिपदिकात् स्वार्थे प्रथमा इति तृतीयवाक्यस्य अर्थः। तस्योदाहरणञ्च– द्रोणः, खारी इत्याद्येव। तथा चातिरिक्तव्युत्पत्तिकल्पना, भाष्यविरोधः, वार्तिकविरोधः, द्वन्द्वानुपपत्तिः इति दोषा अपि न सन्ति इति सर्वं सुसङ्गतम्।

### उपसंहृतिः

एवञ्च प्रातिपदिकार्थे लिङ्गमात्राधिक्ये परिमाणाधिक्ये वचनमात्रे वर्तमानात् प्रातिपदिकात्स्वार्थे प्रथमा भवति इति प्रातिपदिकार्थसूत्रार्थः इति कैयटनागेशौ। तत्र परिमाणशब्दात्कर्मणि ल्युट् इति कैयटः, करणे ल्युट् इति नागेशः इति विशेषः। प्रातिपदिकार्थे लिङ्गमात्राधिक्ये वचनमात्रे वर्तमानात्प्रातिपदिकात् स्वार्थे परिमाणविशेषवाचकात् प्रातिपदिकात् परिमाणसामान्यार्थे च प्रथमा भवति इति प्रातिपदिकार्थसूत्रार्थः इति दीक्षितः।परिमेयसङ्ग्रहाय परिमाणग्रहणमिति कैयटः, शाब्दबोध-वैलक्षण्याय परिमाणग्रहणमिति दीक्षितः, परिमाणवाचकेभ्यः प्रथमाविधानार्थं परिमाणग्रहणमिति नागेशः।एतेषु सूत्रभाष्य-कर्त्रज्ञानकल्पना-वार्तिकविरोध-भाष्यविरोध-द्वन्द्वानुपपत्तिरूपदोषा-भावात् अतिरिक्तव्युत्पत्तिकल्पनाभावेन लाघवाच्च नागेशमतमेव समीचीनमिति दृढं कथयितुं शक्यते। किञ्च नागेशमते उररीक्रियमाणे एव सूत्रकारपक्षे परिमाणग्रहणं सार्थक्यमेति, कैयटपक्षे पदे एव लक्षणा इति रीत्या, दीक्षितपक्षे शब्दशास्त्रे शाब्दबोधवैलक्षण्याय न किञ्चिदुपादीयते इति रीत्या परिमाणग्रहणस्य वैयर्थ्यात्। अतो निष्कर्षतया प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाण-मात्राधिक्ये वचनमात्रे प्रथमा भवति इति प्रातिपदिकार्थसूत्रस्यार्थः। परिमाणग्रहणस्य चोदाहरणं द्रोण इत्येव इति आयातम्। प्रक्रियाकौमुदीकारस्यापि इदमेवाभिप्रेतं स्यात्, अत एव तेन द्रोणः, खारी इत्याद्येवोदाहरणरूपेण उपन्यस्तम्। द्रोणो व्रीहिरित्यत्र प्रक्रियाकौमुदीकारस्य तात्पर्यप्रतिपादनं तु प्रकाशकृतः स्वीयाभिप्रायः स्यात्, रामचन्द्राचार्यस्य नापि स्यात्। किञ्च इदमपि धेयं यत् दीक्षितसमयप्रतिपादिकायां सिद्धान्तकौमुद्यां तु प्रातिपदिकार्थमात्रे लिङ्गमात्राधिक्ये परिमाणमात्रे वचनमात्रे च प्रथमा स्यात् इति पाठ एव अपेक्षत इत्यलमत्यक्षरक्षरणेन॥

### सन्दर्भग्रन्थाः

[1]. पतञ्जलिः, व्याकरणमहाभाष्यम् [प्रदीपोद्द्योतोपेतम्] (चतुर्थो भागः), शिवदत्तशर्मा (सम्पा.), चौखम्बासंस्कृतप्रतिष्ठान, देहली, १९८८।

[2]. पतञ्जलिः, व्याकरणमहाभाष्यम् [प्रदीपोद्द्योतोपेतम्] (द्वितीयो भागः), शिवदत्तशर्मा (सम्पा.), चौखम्बासंस्कृतप्रतिष्ठान, देहली, १९८८।

[3]. नागेशभट्टः, बृहच्छब्देन्दुशेखरः, सीतारामशास्त्री (सम्पा.), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९८।

[4]. नागेशभट्टः, लघुशब्देन्दुशेखरः [शेखरदीपकोपेतः], गोपालशास्त्रीनेने (भूमिकालेखकः), चौखम्भा प्रकाशन, वाराणसीः, २०१५।

[5]. नारायणभट्टः, प्रक्रियासर्वस्वम् (चतुर्थो भागः), के. साम्बशिवशास्त्री (सम्पा.), त्रिवाङ्करविश्वविद्यालयः, त्रिवान्द्राम्, १९५४।

[6]. गदाधरभट्टाचार्यः, व्युत्पत्तिवादः [जयाटीकोपेतः], उमेशमिश्रः (सम्पा.), वाणीविलासप्रकाशन, वाराणसी, १९८८।

[7]. भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी [लक्ष्मीव्याख्योपेता] (द्वितीयोंऽशः), बालकृष्णशर्मपञ्चोली (सम्पा.), मोतीलालबनारसीदास, वाराणसी, १९६६।

[8]. भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी [बालमनोरमा-तत्त्वबोधिनीसहिता] (प्रथमोभागः), गिरिधरशर्मा परमेश्वरानन्दशर्मा च (सम्पा.), मोतीलालबनारसीदास, वाराणसी, २०१०।

[9]. भट्टोजिदीक्षितः, प्रौढमनोरमा [लघुशब्दरत्न-भैरवी-रत्नप्रभोपेता], सभापतिशर्मा (सम्पा.), वाणीविलासप्रकाशन, वाराणसी, २०१२।

[10]. रामचन्द्रः, प्रक्रियाकौमुदी [प्रकाशव्याख्यासहिता] (द्वितीयोभागः), मुरलीधरमिश्रः (सम्पा.), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २०००।

[11]. वामनः जयादित्यः च, काशिका [न्यास-पदमञ्जरी-भावबोधिनीसहिता] (तृतीयो भागः), जयशङ्करलालत्रिपाठी सुधाकरमालवीयः च (सम्पा.), ताराबुकएजेन्सी, वाराणसी, १९८६।